योग्यत्वे ।"भोजनाच्छादनं दद्यादनुकालं विशेषत" इति ।

**अनुकीर्त्तन** न० अनु+कृत–णिच्–ल्युट् कीर्त्तादेशः । कथने "शार्ङ्गं भवति तत् सर्वं हरेर्नामानुकीर्त्तनादिति" स्मृतिः ।

**अनुकूल** त्रि० कूलमावरणं स्नेहेनानुबन्ध इति यावत् अनुगतस्तम् अत्या०स० । सहचरे, सहाये, स्वपक्षपातिनि, "नारीणामनुकूलमाचरसि चेज्जानासीति" का० प्र० । "अनुकूलयतीन्द्रोऽपि स्वर्गद्रुमविभूषणैरिति" कुमा० अनुकूलयति अनुकूलं करोतीति नामधातुः । ङनीङन्ते स्त्री राजनि० । अलङ्कारशास्त्रप्रसिद्धे "अनुकूल एकरति"रित्युक्ते नायकभेदे "एकस्यामेव नायिकायामासक्तोऽनुकूलनायक" इति तदर्थः यथा "अस्माकं सखि ! वाससी न रुचिरे, ग्रैवेयकं नोज्ज्वलं, नो वक्रा गतिरुद्धतं, न हसितं, नैवास्ति कश्चिन्मदः । किन्त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतो दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्" इति॥ "अनुकूलं प्रातिकूल्यमानुकूल्यानुबन्धि चेत्" इति (सा० द०) इत्युक्तेऽर्थालङ्कारभेदे न० । यथा "कुपितासि यदा तन्वि ! निधाय करजक्षतम् । बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा ॥" "सर्वेषामात्मत्वेनानुकूले परमेश्वरे पु० "अनुकूलः शतावर्त्तइति"विष्णुस०। सर्वेषामात्मत्वादनुकूलः न हि स्वस्मिन् प्रतिकूलं स्वयमाचरतीति" भा० ।

**अनुकृति** स्त्री अनु+कृ–क्तिन् । "अनुकरणे । ओमित्येतदनुकृतिर्ह स्म वा" इति श्रुतिः ।

**अनुकृष्ट** अनु+कृष–कर्म्मणि क्त । कृताकर्षणे, अनुवर्त्तिते च ।

**अनुक्त** त्रि० न उक्तः । अनभिहिते अकथिते उक्तिश्च प्रायेण तिङ्कृत्तद्धितसमासैः "तत्र तिङा हरिः सेव्यते, कृता चैत्रेण गतः, तद्धितेन, शतेन क्रीतः यत् । शत्यः, समासेन, आरूढो वानरो यमिति वाक्ये आरूढवानरो वृक्षः सर्वत्र कर्म्मण उक्तत्वात् प्रातिपदिकार्थे प्रथमा । तैरुक्तभिन्ने तु ग्रामं गच्छति, ग्रामं गत, वेदेऽधीती, इत्यादौ "अनभिहिते" इति द्वितीयाद्येव एवमन्यकारकेऽप्युदाहार्य्यम् "अनुक्तसमुच्चयश्चकार" इति रघु० अनियोजिते च "असावनुक्तोऽपि सहाय एव इति" कुमा० ।

**अनुक्थ** त्रि० नास्ति उक्थं स्तोत्रं यस्य । स्तोत्रशून्ये "किं यामनिन्द्राः कृणवन्ननुक्था" इति ऋ०५,२,३, 'अनुक्थाः अस्तुतय' इति भा० ।

**अनुक्रम** त्रि० अनुगतः क्रमम् अत्या०स० । अनुगतक्रमे क्रमानुलङ्घिते, अनुक्रमश्च यथोत्तरं यस्य पाठः करणं वा उचितं तदनतिक्रमेण तस्यानुष्ठानरूपा परिपाटी । "प्रचक्रमे वक्तुमनुक्रमज्ञा" इति रघुः । क्रमश्च स्थानं तत्स्वरूपादि क्रमशब्दे वक्ष्यते । क्रममनतिक्रम्य यथार्थे अव्ययी० । क्रमानतिक्रमे अव्य० ।

**अनुक्रमणिका** स्त्री अनुक्रम्यते यथोत्तरं परिपाट्या आरभ्यतेऽनया अनु+क्रम–करणे ल्युट् स्त्रीत्वात् ङीप् स्वार्थे कनि ह्रस्वः । अनुक्रमज्ञापके, ग्रन्थाद्यंशभेदे उक्तस्य वक्तव्यस्य वार्थसङ्ग्रहस्य ग्रन्थशेषे, क्वचिदादौ वा संग्राहके पुराणादेरंशविशेषे । स्वार्थे काभावेऽनुक्रमणीत्यपि, तत्रैव । तत्र आदौ यथा "भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः पर्व्वानुक्रमणी पूर्व्वं द्वितीयः पर्व्वसंग्रह" भार० आदि० । अन्ते यथा 'अनुक्रमणिकाध्यायं तथा माहात्म्यमुत्तममिति" काशीख० । एवमन्यत्र दृश्यम् ।

**अनुक्री** पु० अनुक्रियते अनु–कृ–उणा० बा० ई किच्च । साद्यस्कक्रतुभेदे, "षट् साद्यस्का इत्युपक्रम्य "हीनश्चानुक्रीः" इति कात्या०२२,२,१८, उक्तम् "अनुक्रीर्नाम साद्यस्कः क्रतुः स हीनस्य भवतीति" तद्व्याख्या ।

**अनुक्रोश** पु० अनुक्रोशत्यनेन अनु+क्रुश–आह्वाने रोदने च घञ् । दयायाम् । परदुःख प्रहरणेच्छारूपदयया हि परक्रोशं दृष्ट्वा तदनु रोदनं क्रियते इति तस्यास्तथात्वम् । अनुगतः क्रोशं गतिस० । प्राप्तक्रोशाध्वके त्रि० ।

**अनुक्षण** न० वीप्सायाम् अव्ययी० । प्रतिक्षणे अनवरते, अनुगतं क्षणम् अत्या०स० । अजस्रवृत्तौ त्रि० ।

**अनुग** त्रि०अनुगच्छति अनु+गम–ड । पश्चाद्गामिनि, "गोत्रिक्थानुगः पिण्डः व्यपैति ददतः स्वधेति" "छिद्रं निवारयेत् सर्वं श्वसूकरमुखानुगमिति" "प्रमदामनुत्पथं नेतुं कामक्रोधवशानुगमिति" च मनुः । सहचरे, आनुलोम्येन गते, सेवके च । "तद्भूतनाथानुग ! नार्हसि त्वमिति" रघुः ।

**अनुगङ्ग** अव्य० गङ्गायाम् विभक्त्यर्थे अव्ययी० । गङ्गायामित्यर्थे । परिसङ्ख्या० अत्र । आनुगङ्गम् अनुगङ्गभवे त्रि० ।

**अनुगत** त्रि० अनु+गम–क्त । पश्चाद्गते, सहगते, आनुलोम्यं गते, सामान्यधर्म्मग्रहणेन संगृहीतेऽखिले विशेषे, अधीने च । "आगच्छद्यत्र काकुत्स्थः स्वर्गाय समुपस्थितः विमानवरकोटीभिर्देवैरनुगतस्तदेति" रामा० ।

**अनुगति** स्त्री अनु+गम–क्तिन् । अनुगमने, पश्चाद्गतौ, "बलस्य चतुरङ्गस्य नायकानुगतिर्नय"इति "गतानुगतिकन्यायः" ।

**अनुगम** पु० अनु+गम–घञ् वृद्ध्यभावः । पश्चाद्गमने, "इहतेर्धातोरर्थानुगमादिति" शा०भा० । सहायीभवने, सामा-